षाण्मातुरः, पुं, ( षसां मातॄणामपत्यमिति । "मातुरुत्संख्यासंभद्रपूर्व्वायाः ।" ४।१।११५। इति अण् । उकारश्चान्तादेशः ।) कार्त्तिकेयः । इत्यमरः ॥

षात्वणत्विकः, त्रि, षत्वणत्वविधायकशास्त्रव्याख्यानम् । तत्र भवः । यथा । षत्वणत्वयोर्विधायकं शास्त्रं षात्वणत्वं तस्य व्याख्यानात्तत्र भवो वा षात्वणत्विकः । इति सिद्धान्तकौमुदी ॥

षाध, ओ न य सिद्धौ । इति कविकल्पद्रुमः ॥ ( स्वा०-दिवा०-च-पर०-अक०-अनिट् । ) औ, शिषात्सति । न, साध्नोति । य, साध्यति । सिद्धिर्निष्पत्तिः । इति दुर्गादासः ॥

षान्त्व,क सामयोगे । इतिकविकल्पद्रुमः॥(चुरा० पर०-सक०-सेट् । ) क, सान्त्वयति शोकार्त्तं दयालुः । सिषान्त्वयिषति । इति दुर्गादासः ॥

षाष्ठः, त्रि, षष्ठः । षष्ठशब्दात् स्वार्थे ण (अण्) प्रत्ययेन निष्पन्नः ॥ (पुं, षष्ठो भागः । "षष्ठाष्टमाभ्यां ञ च ।" ५ । ३ । ५० । इति ञः । इति सिद्धान्तकौमुदी ॥)

षि, ग ञ न बन्धे। इति कविकल्पद्रुमः॥(क्र्या०-स्वा०-च-उभ०-सक०-अनिट्।) मूर्द्धन्यादिः । ग ञ, सिनाति सिनीते । न, सिनोति सिनुते । इति दुर्गादासः ॥

षिच, प श ञ औ क्षरणे । इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट् । ) प श ञ, सिञ्चति सिञ्चते । औ, सेक्ता । सिषिचुरवनिमम्बुवाहाः । इति भारविः । इति दुर्गादासः ॥

षिट, अनादरे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मूर्द्धन्यादिः । सेटति खलं लोकः । इति दुर्गादासः ॥

षिड्गः, पुं, ( षिट् अनादरे + बाहुलकात् अतोऽपि गन् सत्वाभावश्च । इत्युणादिटीकायां उज्ज्वलः । १ । १२३ ।) कामुकः । लोचा इति भाषा । तत्पर्य्यायः । विदग्धः २ नागरः ३ भविलः ४ छिदुरः ५ विटः ६ व्यलीकः ७ पटप्रज्ञः ८ कामकेलिः ९ विदूषकः १० । इति भूरिप्रयोगः ॥ पीठकेलिः ११ पीठमर्द्दः १२ । इति त्रिकाण्डशेषः ॥ पल्लविकः १३ । इति हेमचन्द्रः ॥ ( यथा, माघे । ५ । ३४ ।

"पत्यानमाशु विजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कितेताः ।
स्तम्बेरमः परिणिनं सुरसावुपैति
षिड्गैरगद्यत ससम्भ्रममेव काचित् ॥")

षिध,गत्याम् । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) सेधति । निष्ठायां सिधितः । इति दुर्गादासः ॥

षिध,उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्वा वेट् । ) सेधति । उ, सेधित्वा सिद्धा। क्वावेट्त्वान्नेम् डीश्वीति इमो निषेधे सिद्धः । इति दुर्गादासः ॥

षिध, उ य औ सिद्धौ । इति दुर्गादासः ॥ ( दिवा०- पर०- अक०-अनिट् । क्वावेट् ।) उ, सेधित्वा सिद्धा । य, सिध्यति । औ, असैत्सीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । सिद्धिर्निष्पत्तिः । सिध्यति घटो निष्पन्नः स्यात् इत्यर्थः । इति दुर्गादासः ॥

षिध, ऊ शिवे । शास्त्रे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-शिवे अक०-अनुशासने सक०-वेट् ।) मूर्द्धन्यादिः । ऊ, असेधीत् असैत्सीत् । शिवं मङ्गलम् । तदाकर्मकः । सिद्धो वर्णसमाम्नाय इति कातन्त्रस्याद्यसूत्रम् । शास्त्रमनुशासनम् । सेधति शिष्यं गुरुः । इति दुर्गादासः ॥

षिन्भ, उ हिंसने । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-दीप्तौ अक०-सेट् । क्वावेट् उ, सिम्भित्वा सिब्ध्वा । इति दुर्गादासः ॥

षिल, श उञ्छे । इति कविकल्पद्रुमः ॥ (तुदा० पर०-सक०-सेट् । ) उञ्छ उद्धृतशस्यशेषापहरणम् । श, सिलति धान्यं दीनः । सेलिता । इति दुर्गादासः ॥

षिव, य उ तन्तुसन्ततौ । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-सक०-सेट् । क्वावेट् ।) तन्तुततिस्तन्तुभिर्ग्रन्थनम् । य, सीव्यति वस्त्रं सौचिकः । उ, सेवित्वा स्यूत्वा । इति दुर्गादासः ॥

षु, गतौ । ऐश्वर्य्यप्रसवयोश्च । इति कविकल्पद्रुमः (भ्वा०-पर०-सक०-अनिट् । ) सवति । इति दुर्गादासः ॥

षु, ञ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक०-अनिट् । ) ञ, सुषाव सुषुवे । इति दुर्गादासः ॥

षु,न ञ सन्धाक्लेदपीड़मन्थे । इति कविकल्पद्रुमः॥ ( स्वा०-उभ०-सक०-अक०च-अनिट् । ) मूर्द्धन्यादिः । न ञ, सुनोति सुनुते । सन्धा सन्धानम् । क्लेद इह स्नानं मङ्गलस्नानं वा । तथाच षु ञ अभिषवे । इति प्राञ्चः । अभिषवः पीड़नं मन्थनं चेति त्रिलोचनादयः । स्नानञ्चेति दुर्गः । सन्धानं मङ्गलस्नानं वेति धातुप्रदीपः । इति दुर्गादासः ॥

षु, ल ऐश्वर्य्यप्रसवयोः । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सक० च-सेट् । ) ल, सौति । इति दुर्गादासः ॥

षुः, पुं, गर्भविमोचनम् । एकाक्षरकोषः ॥

षुट्ट, क तीक्ष्ण्ये । अनादरे । इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट् । ) पञ्चमस्वरी टद्वयान्तः । क, सुट्टयति । दन्त्यादिरयमिति भीमः । तीक्ष्ण्यमत्यीभावः । इति दुर्गादासः ॥

षुन्भ, दीपनहिंसयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-दीपने अक०-हिंसायां सक०-सेट्) मूर्द्धन्यादिः । पञ्चमस्वरी । सुम्भति सुषुम्भ । इति दुर्गादासः ॥

षुर, श भश्ययोः । इति कविकल्पद्रुमः ॥(तुदा०-पर०-अक०-सेट् ।) मूर्द्धन्यादिः । श, सुरति सोरिता सुषोर । भा दीप्तिः । ऐश्वर्य्यमैश्वर्य्यम् । इति दुर्गादासः ॥

षुह, ल य तृप्ति । शक्तौ । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-सक०-सेट् । ) शक्तिः क्षमा । ऌ, असुहत् । य, सुह्यति दुःखं मुनिः सहत इत्यर्थः । सुषोह । इति दुर्गादासः ॥

षू, ङ ल सूतौ । इति कविकल्पद्रुमः ॥ (अदा० आत्म०-सक०-अनिट् । ) मूर्द्धन्यादिः । ङ ल, सूते । इति दुर्गादासः ॥

षू,य ङ औ सूतौ । इति कविकल्पद्रुमः ॥(दिवा० आत्म०-सक० अनिट् ।) य ङ, सूयते । ओ, सूनः । सूतिर्गर्भविमोचनम् । सूते पुत्त्रं नारी । अन्यत्रापि धर्म्मोऽर्थं प्रसूयते । इति दुर्गादासः॥

षू, श क्षेपे । इति कविकल्पद्रुमः ॥ (तुदा०-पर० सक०-अनिट् । ) मूर्द्धन्यादिः । श, सुवति । इति दुर्गादासः ॥

षूः, स्त्री, गर्भविमोचनम् । इति कश्चिदेकाक्षरकोषः ॥

षूद, क्षरणे । इति प्राञ्चः । (भ्वा०-पर०-सक० सेट् ।) क्षरणमवदारणं हिंसोपलक्षणमिति रमानाथेन व्याख्यातम् । इति दुर्गादासः ॥

षूद, क आश्रुतिहत्योः । निरासे। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) आश्रुतिरङ्गीकारः । क, सूदयति धनं विप्राय दाता । रमानाथस्तु आस्रवण इति दन्त्यसकारं पठित्वा सूदयति मदिरा भाण्डात् क्षरति इत्यर्थ इत्याह । इति दुर्गादासः ।

षूद,ङ निरासे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । ) षष्ठस्वरी । ङ, सूदते । निरासो निःक्षेपः । इति दुर्गादासः ॥

षूर, ङ य ई स्तम्भे । हिंसे इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट् । निष्ठायां अनिट् ।) ङ य, सूर्य्यते । ई, सूर्णः । केचिदयं न मन्यते । स्तम्भो जड़ीभावः । इति दुर्गादासः ॥

षूर्क्ष, नादरे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) रेफयुक्तः । षष्ठस्वरी । सूर्क्षति दुष्टं लोकः । इति दुर्गादासः ॥

षूर्क्ष्य, ईर्ष्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् । ) सूर्क्ष्यति सुषूर्क्ष्य । यद्यान्तोऽयमित्येके । इति दुर्गादासः ॥

षूष, प्रसवे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) षष्ठस्वरी मूर्द्धन्यादिः । सूषति । इति दुर्गादासः ॥

षेक, ऋ ङ सर्पणे । इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-सक०-सेट् । ) मूर्द्धन्यादिः । अस्य षोपदेशविधौ वर्ज्जनेऽपीह पाठः कस्यचिदनुरोधात् । ऋ, असिषेकत् । ङ, सेकते । इति दुर्गादासः ॥

षेल, ऋ चालगत्योः । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) मूर्द्धन्यादिः । ऋ, असिषेलत् । इति दुर्गादासः ॥